National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(58): 233-236
© 2025 NJHSR
www.sanskritarticle.com

**निलेश गुप्ता**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**निलेश गुप्ता**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# वाल्मीकिरामायणस्य युद्धकाण्डस्थानां कृत्यप्रत्ययान्तशब्दानाम् अध्ययनम्

**निलेश गुप्ता**

**सारांशः**

शोधनिबन्धेऽस्मिन् वाल्मीकिरामायणस्य युद्धकाण्डस्थानां कृत्यप्रत्ययान्तशब्दाः प्रतिपादिताः। आदौ प्रत्ययानां भेदान् उक्त्वा कृत्यप्रत्ययानां सामान्यपरिचयः प्रदर्शितः। अष्टाध्याय्यां कृदतिङ् इति सूत्रेण धात्वधिकारे ये चतुर्विंशत्यधिकैकशतं (124) प्रत्ययाः पठिताः। तेषु चतुर्विंशत्यधिकैकशतेषु (124) कृत्प्रत्ययेषु सप्तप्रत्ययाः कृत्यप्रत्ययरूपेणापि व्यवह्रियन्ते। तेषां सप्तप्रत्ययविधायकसूत्राणि एकत्रीकृत्य सोदाहरणैः सह अत्र अवलोकितानि वर्तन्ते। एवञ्च तेषां सूत्राणां उदाहरणरूपेण वाल्मीकिरामायण-स्थयुद्धकाण्डे स्थितानां कृत्यप्रत्ययान्तपदानां व्यवहारः कृतः वर्तते। यतोहि रामायणस्य युद्धकाण्डे कृत्यप्रत्ययान्तशब्दाः बहवः दृश्यन्ते, तथापि विस्तारभयात् केषाञ्चन एव कृत्यप्रत्ययान्तशब्दानाम् अध्ययनम् अस्मिन् शोधप्रपत्रे क्रियते।

**प्रस्तावना**

प्रायः मूलप्रकृतेः परं येषां वर्णसमूहानां योगेन नूतनानि पदानि निर्मीयन्ते ते प्रत्ययाः इत्युच्यन्ते। प्रायः सर्वे प्रत्ययाः प्रकृतेः अनन्तरमागच्छन्ति। प्रत्ययानां स्वीयार्थः न भवति न च तेषां स्वतन्त्रास्तित्वम्। प्रायः प्रत्यययोगेन अर्थस्य परिवर्तनं भवति।

प्रत्ययानां सप्त भेदाः सन्ति । ते एतादृशाः -

१) **सनादिप्रत्ययाः** - एते धातुभ्यः तथा प्रातिपदिकेभ्यः अनन्तरमागच्छन्ति । एते सर्वे **गुप्तिज्किद्भ्यः सन् (अष्टा. ३.१.५)** इत्यतः **आयादय आर्धद्धातुके वा (३.१.३१)** एतेषु सूत्रेषु दृश्यन्ते ।

२) **विकरणप्रत्ययाः -** एते धातुभ्यः अनन्तरमागच्छन्ति । एते सर्वे **स्यतासी लृलुटोः (अष्टा.३.१.३३)** इत्यतः **लिङ्याशिष्यङ् (अष्टा.३.१.८६)** इति यावत् पठ्यन्ते ।

३) **तिङ्-प्रत्ययाः** - एते धातुभ्यः अनन्तरमागच्छन्ति। एते प्रत्ययाः **तिप्तस्झिसिप्थस्थमिब्वस्मस्ताऽ-तांझथासाथांध्वमिड्वहिमहिङ् (अष्टा. ३.४.७८)** अनेन सूत्रेण विधीयन्ते ।

४) **सुप्-प्रत्ययाः -** एते प्रातिपदिकेभ्यः अनन्तरमागच्छन्ति। एते सर्वे **स्वौजस्.. (अष्टा.४.१.२)** अनेन सूत्रेण विधीयन्ते ।

५) **स्त्री-प्रत्ययाः - अजाद्यतष्टाप् (अष्टा.४.१.४)** इत्यतः **दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽ-न्यतरस्याम् (अष्टा. ४.१.८१)** एतेषु सूत्रेषु स्त्रीप्रत्ययाः पठ्यन्ते ।

६) **तद्धितप्रत्ययाः - तद्धिताः (अष्टा. ४.१.७६)** सूत्राधिकारे पाठिताः सर्वे प्रत्ययाः तद्धितप्रत्ययाः सन्ति।

७) **कृत्-प्रत्ययाः** - एते धातुभ्यः अनन्तरमागच्छन्ति। तृतीयाध्याये पाठिताः सनादिभिन्नाः, विकरण-भिन्नाः तिङ्भिन्नाः सर्वे प्रत्ययाः कृत्-प्रत्ययाः भवन्ति। कृत्प्रत्ययाः कर्त्रर्थे कर्मार्थे भावार्थे च प्रयुज्यन्ते। यथा-

**कर्त्रर्थे -** कृ तृच् कर्ता

**कर्मार्थे -** कृ तव्यत् कर्तव्यम्

**भावार्थे -** शिङ् तव्यत् शयितव्यम्

कृदतिङ् इति सूत्रेण धात्वधिकारे चतुर्विंशत्यधिकैकशतं (124) प्रत्यया: उक्ता:। तेषु चतुर्विंशत्यधिकैकशतं (124) कृत्प्रत्ययेषु सप्तप्रत्यया: कृत्यप्रत्ययरूपेणापि व्यवह्रियन्ते । ते यथा- तव्य, तव्यत्, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् इति । एतेषां प्रत्ययानां कृत् संज्ञा अपि भवति, कृत्यसंज्ञा अपि भवति ।

एतेषां कृत्प्रत्ययानां **कृत्तद्धितसमासाश्च (अष्टा. १.२.४६)** इति सूत्रेण प्रातिपदिकसंज्ञा विधीयते । तेन स्वादिप्रत्यया: भवन्ति । एवञ्च सुप्तिङन्तं पदम् इत्यनेन पदसंज्ञा भवति । पदसंज्ञात्वेन एते प्रयोगार्हा: भवन्ति । **तयोरेव कृत्यक्तखलर्था: (अष्टा. ३.४.७०)** इति सूत्रेण कृत्यप्रत्यया: भावकर्मार्थे प्रयुज्यन्ते ।

**रामायणस्य युद्धकाण्डे स्थितानां कृत्यप्रत्ययान्तानां विचार:**

कृत्याधिकारे सप्तत्रिंशत् सूत्राणि पठितानि सन्ति । अध: तेषां सूत्राणां व्याख्या क्रियते येषां सूत्राणामुदाहरणं रामायणस्य युद्धकाण्डे आगतमस्ति एवञ्च तेषां सूत्राणामुदाहरणस्थाने रामायणस्थयुद्धकाण्डे उपस्थितानां कृत्यप्रत्ययान्तपदानां व्यवहार: क्रियते। येषां सूत्राणामुदाहरणरूपेण कृत्यप्रत्ययान्तशब्दा: रामायणे न लभ्यन्ते तेषां सूत्राणां पाठ: अत्र न क्रियते।

**1. तव्यत् / तव्य-प्रत्ययौ**

**सूत्रम् - तव्यत्तव्यानीयर: (अष्टा. ३.१.९६)** धातो: तव्यत्, तव्य, इत्येतौ प्रत्ययौ भवत:। यथा- **जेतव्यम्।**

**एतावदेव शेषं वो जेतव्यमिह वानरा: ।**[1]

जि-जये इति धातो: **तव्यत्तव्यानीयर: (अष्टा. ३.१.९६)** इति सूत्रेण कर्मणि तव्यत्-प्रत्यये, आर्धधातुकसंज्ञायां इकारस्य **सार्वधातुकार्धधातुकयो: (अष्टा. 7.3.84)** इत्यनेन गुणे शब्दाधिकारप्रक्रियायां जेतव्यम् इति रूपं सिध्यति ।

**रक्षितव्य: ।**

**समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणा: ।।**[2]

रक्ष-पालने इति धातो: **तव्यत्तव्यानीयर: (अष्टा. ३.१.९६)** इति सूत्रेण कर्मणि तव्यत्-प्रत्यये इडागमे अनुबन्धलोपे शब्दाधिकारप्रक्रियायां **रक्षितव्य:** इति रूपं सिध्यति ।

**2. अनीयर् प्रत्यय:**

**सूत्रम् - तव्यत्तव्यानीयर: (अष्टा. ३.१.९६)** धातो: अनीयरिति प्रत्यय: भवति । यथा-

**शङ्कनीय:**

**एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभन: ॥**[3]

शकि शङ्कायाम् इति धातो: नुमागमे, अनुस्वारस्य परसवर्णे कृते **शङ्क्** इति स्थिते **तव्यत्तव्यानीयर: (अष्टा. ३.१.९६)** इति सूत्रेण कर्मणि अनीयर्-प्रत्यये अनुबन्धलोपे च कृते शब्दाधिकारप्रक्रियायां **शङ्कनीयम्** इति रूपं सिध्यति ।

**तपनीय: । (तापनयोग्य:, स्वर्ण: इत्यर्थ:)**

**जातरूपमयैश्चैव तपनीयविभूषणै: ।**[4]

एवमेव बहुत्र दृश्यते ।

तप दाहे इति चुरादिगणीयस्य धातो: **आधृषाद्वा** इति गणसूत्रात् णिजभावे **तव्यत्तव्यानीयर: (अष्टा. ३.१.९६)** इति सूत्रेण कर्मणि अनीयर्-प्रत्यये अनुबन्धलोपे च कृते शब्दाधिकारप्रक्रियायां **तपनीय:** इति रूपं सिध्यति।

**निन्दनीय:**

**शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभि: ।**[5]

णिदि कुत्सायाम् इति धातो: **तव्यत्तव्यानीयर: (अष्टा. ३.१.९६)** इति सूत्रेण कर्मणि अनीयर्-प्रत्यये अनुबन्धलोपे च कृते **निन्द् अनीय** इति जाते शब्दाधिकारप्रक्रियायां **निन्दनीय:** इति रूपं सिध्यति ।

**रञ्जनीय:**

**शत्रो: प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमै:।**[6]

रञ्ज रागे इति धातो: **तव्यत्तव्यानीयर: (अष्टा. ३.१.९६)** इति सूत्रेण कर्मणि अनीयर्-प्रत्यये अनुबन्धलोपे च कृते शब्दाधिकारप्रक्रियायां **रञ्जनीय:** इति रूपं सिध्यति ।

**3. केलिमर् प्रत्यय:**

**केलिमर् उपसंख्यानम्** (वार्तिकम्)॥ अस्योदाहणं रामायणस्य युद्धकाण्डे न लभ्यते ।

**4. यत् प्रत्यय:**

**सूत्रम् - पोरदुपधात् (अष्टा. ३.१.९८)** पवर्गान्ताद् धातो: अकारोपधात् यत् प्रत्ययो भवति । यथा - **उपलभ्य:**

**उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रिय: ।**[7]

उप उपसर्गात् डु लभष् प्राप्तौ इति धातो: **पोरदुपधात् (अष्टा. ३.१.९८)** इति सूत्रेण कर्मणि यत्-प्रत्यये **उपलभ्य** इति रूपे सुबुत्पत्तौ शब्दाधिकारप्रक्रियायां **उपलभ्य:** इति रूपं सिध्यति ।

**प्रतिलभ्य:**

**निहत्य रावणं राम: प्रतिलभ्य च मैथिलीम् ॥**[8]

प्रति उपसर्गात् डु लभष् प्राप्तौ इति धातो: **पोरदुपधात् (अष्टा. ३.१.९८)** इति सूत्रेण कर्मणि यत्-प्रत्यये अनुबन्धलोपे च कृते शब्दाधिकारप्रक्रियायां **प्रतिलभ्य:** इति रूपं सिध्यति ।

**सूत्रम् - शकिसहोश्च (अष्टा. ३.१.९९)** शक्लृ शक्तौ, षह मर्षणे, अनयोर्धात्वो: यत् प्रत्ययो भवति । यथा-

**शक्य:**

**न चायमनुपायेन शक्यस्तरितुमर्णवः ॥**[9]

एवमेव बहुत्र दृश्यते ।

शक-विभाषितो मर्षणे इति धातोः **शकिसहोश्च (अष्टा. ३.१.९९)** इति सूत्रेण कर्मणि यत्-प्रत्यये अनुबन्धलोपे च कृते शब्दाधिकारप्रक्रियायां **शक्यः** इति रूपं सिध्यति।

**5. क्यप् प्रत्ययः**

**सूत्रम् - एतिस्तुशास्वृदृजुषः क्यप् (अष्टा. ३.१.१०९)** एति स्तु शास् वृ दृ जुषित्येतेभ्यः क्यप् प्रत्ययो भवति । यथा-

**सूत्रम् - भृञोऽसंज्ञायाम् (अष्टा. ३.१.११२)** भृञो धातोः असंज्ञायां विषये क्यप् प्रत्ययो भवति । यथा-

भृत्याः

**श्रुत्वा तु तं वानरसैन्यनादं लङ्कागता राक्षसराजभृत्याः ।**[10]

डु भृञ् धारणपोषणयोः इति धातोः **भृञोऽसंज्ञायाम् (अष्टा. ३.१.११२)** इति सूत्रेण कर्मणि क्यप्-प्रत्यये अनुबन्धलोपे तुगागमे अनुबन्धलोपे च **भृत्य** इति रूपे सुबुत्पत्तौ शब्दाधिकारप्रक्रियायां **भृत्याः** इति रूपं सिध्यति । कर्मकराः। भर्तव्याः इत्यर्थः।

एवमेव बहुत्र दृश्यते ।

**सूत्रम् - मृजेर्विभाषा (अष्टा. ३.१.११३)** मृजेर्धातोः विभाषा क्यप् प्रत्ययो भवति । यथा-

विमृज्यः, (विकल्पेन विमार्ग्यः भवति) ।

**विमृज्य वदनं तस्य कपिराजस्य धीमतः ।**[11]

वि उपसर्गात् मृजू शुद्धौ इति धातोः **मृजेर्विभाषा (अष्टा. ३.१.११३)** इति सूत्रेण कर्मणि क्यप्-प्रत्यये अनुबन्धलोपे च कृते शब्दाधिकारप्रक्रियायां **विमृज्यः** इति रूपं सिध्यति।

**सूत्रम्- राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः (अष्टा.३.१.११४)** राजसुय सुर्य मृषोद्य रुच्य कुप्य कृष्टपच्य अव्यथ्य इत्येते शब्दाः क्यपि निपात्यन्ते । यथा- सरति सुवति वा **सूर्यः ।**

**सूर्यः**

**ततोऽस्तमगमत् सूर्यः संध्यया प्रतिरञ्जितः ।**[12]

एवमेव बहुत्र दृश्यते ।

सरति सुवति वा इत्यस्मिन् अर्थे **राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्ट-पच्याव्यथ्याः (अष्टा. ३.१.११४)** इति सूत्रानुसारेण सूर्य इति शब्दे क्यप् प्रत्ययः निपात्यते ।

**सूत्रम् - पदास्वैरिबाह्यापक्ष्येषु च (अष्टा. ३.१.११९)** पदे अस्वैरिणि बाह्यायां पक्ष्ये चर्थे ग्रहेर्धातोः क्यप् प्रत्ययो भवति । यथा-

**प्रगृह्य**

**प्रगृह्य परिघं घोरं मांसशोणितरूषितम् ॥**[13]

एवमेव बहुत्र दृश्यते ।

प्र उपसर्गात् गृह ग्रहणे इति धातोः **पदास्वैरिबाह्यापक्ष्येषु च (अष्टा. ३.१.११९)** इति सूत्रेण कर्मणि क्यप्-प्रत्यये अनुबन्धलोपे शब्दाधिकारप्रक्रियायां **प्रगृह्यः** इति रूपं सिध्यति ।

**सूत्रम् - विभाषा कृवृषोः (अष्टा. ३.१.१२०)** कृञो वृषश्च विभाषा क्यप् प्रत्ययो भवति । करोतेर्ण्यति प्राप्ते वर्षतेः ऋदुपधत्वात् नित्ये क्यपि प्राप्ते विभाषार्भ्यते । यथा-

कृत्यम् (विकल्पे- कार्यम्)

**कृत्यमस्ति महज्जाने कर्तव्यं इति शत्रुभिः ॥**[14]

एवमेव बहुत्र दृश्यते ।

डु कृञ् करणे इति धातोः **विभाषा कृवृषोः (अष्टा. ३.१.१२०)** इति सूत्रेण कर्मणि क्यप्-प्रत्यये अनुबन्धलोपे तुगागमे अनुबन्धलोपे शब्दाधिकारप्रक्रियायां **कृत्यम्** इति रूपं सिध्यति ।

**6. ण्यत् प्रत्ययः**

**सूत्रम् - ऋहलोर्ण्यत् (अष्टा. ३.१.१२४)** ऋवर्णान्ताद् धातोर्हलन्ताच् च ण्यत् प्रत्ययो भवति । यथा-

**कार्यम्**

**हनूमन्तं कृतात्मानं कृतकार्यमुपागतम् ॥**[15]

डु कृञ् करणे इति धातोः **ऋहलोर्ण्यत् (अष्टा. ३.१.१२४)** इति सूत्रेण कर्मणि ण्यत्-प्रत्यये अनुबन्धलोपे च कृते **कृ य** इति जाते **अचो ञ्णिति** इति सूत्रेण अजन्तस्याङ्गस्य णिति परे वृद्धि-आदेशे शब्दाधिकारप्रक्रियायां **कार्यम्** इति रूपं सिध्यति ।

एवमेव बहुत्र दृश्यते ।

**सम्प्रहार्यः**

**एवं प्रकारैर्बहुभिः संप्रहार्य यशस्विनि ।।**[16]

सम् प्र उपसर्गाभ्यां हृञ् हरणे इति धातोः **ऋहलोर्ण्यत् (अष्टा. ३.१.१२४)** इति सूत्रेण कर्मणि ण्यत्-प्रत्यये अनुबन्धलोपे च कृते **सम्प्र हृ य** इति जाते **अचो ञ्णिति** इति सूत्रेण अजन्तस्याङ्गस्य णिति परे वृद्धि-आदेशे शब्दाधिकारप्रक्रियायां **सम्प्रहार्यः** इति रूपं सिध्यति । श्लोकेऽस्मिन् विसर्गस्य लोपः दृश्यते ।

**सम्प्रधार्यः**

**संप्रधार्य यथान्यायं तद् भवान् कर्तुमर्हति ॥**[17]

सम् प्र उपसर्गाभ्यां धृञ् धारणे इति धातोः **ऋहलोर्ण्यत् (अष्टा. ३.१.१२४)** इति सूत्रेण कर्मणि ण्यत्-प्रत्यये अनुबन्धलोपे च कृते **सम् प्र धृ य** इति जाते **अचो ञ्णिति** इति सूत्रेण अजन्तस्याङ्गस्य णिति परे वृद्धि-आदेशे शब्दाधिकारप्रक्रियायां **सम्प्रधार्यः** इति रूपं सिध्यति। श्लोकेऽस्मिन् विसर्गस्य लोपः दृश्यते ।

**वाक्यम्**

**श्रुत्वा हनुमतो वाक्यं यथावद् अभिभाषितम् ।**[18]

एवमेव बहुत्र दृश्यते ।

ब्रूञ् व्यक्तायां वाचि इति धातोः **ब्रुवो वचिः (अष्टा. २.४.५३)** इति सूत्रेण वच् आदेशे **ऋहलोर्ण्यत् (अष्टा. ३.१.१२४)** इति सूत्रेण कर्मणि ण्यत्-प्रत्यये अनुबन्धलोपे च कृते **वच् य** इति जाते **अचो ञ्णिति (अष्टा. ७.२.११५)** इति सूत्रेण अजन्तस्याङ्गस्य णिति परे वृद्धि-आदेशे **वाच् य** इति जाते शब्दसंज्ञार्थे **चजोः कु घिण्ण्यतोः (अष्टा. 7.3.52)** इति सूत्रेण कुत्वे वर्णसम्मेलने शब्दाधिकारप्रक्रियायां **वाक्यम्** इति रूपं सिध्यति ।

**निष्कर्षः**

संस्कृतसाहित्ये कृदन्तशब्दानां प्रयोगः प्रचुरः दृश्यते। अतः कृदन्तज्ञानं विना व्याकरणज्ञानं न सम्भवति। कवयः काव्येषु क्रियापदस्थाने कृदन्तानां व्यवहारं बहुत्र कुर्वन्ति, तत्र कृत्यप्रत्ययानां अत्यन्तं महत्त्वं विद्यते। तथैव रामायणस्य युद्धकाण्डेऽपि कृत्यप्रत्ययान्तानां प्रयोगः बहुत्र दृश्यते। परन्तु विस्तारभयात् अस्मिन् शोधप्रपत्रे केषांश्चन एव कृत्यप्रत्ययान्तशब्दानाम् अध्ययनम् कृतम्।

**परिशीलितग्रन्थाः**


- **काशिकावृत्तिः** तारा पब्लिकेशन्स, वाराणसी, 1966
- **पतञ्जलिकृत महाभाष्यम्** डेक्कन एजुकेशन सोसायटी, पुणे, 1963
- **पाणिनीय अष्टाध्यायी** SINDHU CHARAN BOSE, PANINI OFFICE, 1898
- **मूलवाल्मीकिरामायणम्** गीताप्रेस, गोरखपुर Part-II, संवत्- 2079
- **वैयाकरणसिद्धान्तकौमुदी** चौखम्बा सुरभारती प्रकाशन, वाराणसी


**पादटीका-**

[1] वाल्मीकिरामायणे युद्धकाण्डे 89.16
[2] तत्रैव 113.44
[3] तत्रैव 18.11
[4] तत्रैव 22.20
[5] तत्रैव 87.13
[6] तत्रैव 104.6
[7] तत्रैव 88.43
[8] तत्रैव 125.38
[9] तत्रैव 4.98
[10] तत्रैव 34.28
[11] तत्रैव 48.36
[12] तत्रैव 38.19
[13] तत्रैव 8.9
[14] तत्रैव 11.18
[15] तत्रैव 1.14
[16] तत्रैव 113.36
[17] तत्रैव 10.25
[18] तत्रैव 1.1